श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ द्विचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विचत्वारिंशः सर्गः ॥

## सौवर्णमृगरूपं धारयित्वा मारीचस्य श्रीरामाश्रमे गमनं सीताकर्तृकं तस्य दर्शनं च

एवमुक्त्वा तु परुषं मारीचो रावणं ततः।
गच्छावेत्यब्रवीद् दीनो भयाद् रात्रिञ्चरप्रभोः ॥ **3.42.1** ॥

दृष्टश्चाहं पुनस्तेन शरचापासिधारिणा।
मद्वधोद्यतशस्त्रेण निहतं जीवितं च मे ॥ **3.42.2** ॥

नहि रामं पराक्रम्य जीवन् प्रतिनिवर्तते।
वर्तते प्रतिरूपोऽसौ यमदण्डहतस्य ते ॥ **3.42.3** ॥

किं नु कर्तुं मया शक्यमेवं त्वयि दुरात्मनि।
एष गच्छाम्यहं तात स्वस्ति तेऽस्तु निशाचर ॥ **3.42.4** ॥

प्रहृष्टस्त्वभवत् तेन वचनेन स राक्षसः।
परिष्वज्य सुसंश्लिष्टमिदं वचनमब्रवीत् ॥ **3.42.5** ॥

एतच्छौटीर्ययुक्तं ते मच्छन्दवशवर्तिनः।
इदानीमसि मारीचः पूर्वमन्यो हि राक्षसः ॥ **3.42.6** ॥

आरुह्यतामयं शीघ्रं खगो रत्नविभूषितः।
मया सह रथो युक्तः पिशाचवदनैः खरैः ॥ **3.42.7** ॥

प्रलोभयित्वा वैदेहीं यथेष्टं गन्तुमर्हसि।
तां शून्ये प्रसभं सीतामानयिष्यामि मैथिलीम्॥ **3.42.8**॥

ततस्तथेत्युवाचैनं रावणं ताटकासुतः।
ततो रावणमारीचौ विमानमिव तं रथम्॥ **3.42.9**॥

आरुह्यायतुः शीघ्रं तस्मादाश्रममण्डलात्।
तथैव तत्र पश्यन्तौ पत्तनानि वनानि च॥ **3.42.10**॥

गिरींश्च सरितः सर्वा राष्ट्राणि नगराणि च।
समेत्य दण्डकारण्यं राघवस्याश्रमं ततः॥ **3.42.11**॥

ददर्श सहमारीचो रावणो राक्षसाधिपः।
अवतीर्य रथात् तस्मात् ततः काञ्चनभूषणात्॥ **3.42.12**॥

हस्ते गृहीत्वा मारीचं रावणो वाक्यमब्रवीत्।
एतद् रामाश्रमपदं दृश्यते कदलीवृतम्॥ **3.42.13**॥

क्रियतां तत् सखे शीघ्रं यदर्थं वयमागताः।
स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा॥ **3.42.14**॥

मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह।
स तु रूपं समास्थाय महदद्भुतदर्शनम्॥ **3.42.15**॥

मणिप्रवरशृङ्गाग्रः सितासितमुखाकृतिः।
रक्तपद्मोत्पलमुख इन्द्रनीलोत्पलश्रवाः॥ **3.42.16**॥

किञ्चिदभ्युन्नतग्रीव इन्द्रनीलनिभोदरः।
मधूकनिभपार्श्वश्च कञ्जकिञ्जल्कसन्निभः॥ **3.42.17**॥

वैदूर्यसङ्काशखुरस्तनुजङ्घः सुसंहतः।
इन्द्रायुधसवर्णेन पुच्छेनोर्ध्वं विराजितः॥ **3.42.18**॥

मनोहरस्निग्धवर्णो रत्नैर्नानाविधैर्वृतः।
क्षणेन राक्षसो जातो मृगः परमशोभनः॥ **3.42.19** ॥

वनं प्रज्वलयन् रम्यं रामाश्रमपदं च तत्।
मनोहरं दर्शनीयं रूपं कृत्वा स राक्षसः॥ **3.42.20** ॥

प्रलोभनार्थं वैदेह्या नानाधातुविचित्रितम्।
विचरन् गच्छते सम्यक् शाद्वलानि समन्ततः॥ **3.42.21** ॥

रौप्यैर्बिन्दुशतैश्चित्रं भूत्वा च प्रियदर्शनः।
विटपीनां किसलयान् भक्षयन् विचचार ह॥ **3.42.22** ॥

कदलीगृहकं गत्वा कर्णिकारानितस्ततः।
समाश्रयन् मन्दगतिं सीतासन्दर्शनं ततः॥ **3.42.23** ॥

राजीवचित्रपृष्ठः स विरराज महामृगः।
रामाश्रमपदाभ्याशे विचचार यथासुखम्॥ **3.42.24** ॥

पुनर्गत्वा निवृत्तश्च विचचार मृगोत्तमः।
गत्वा मुहूर्तं त्वरया पुनः प्रतिनिवर्तते॥ **3.42.25** ॥

विक्रीडंश्च क्वचिद् भूमौ पुनरेव निषीदति।
आश्रमद्वारमागम्य मृगयूथानि गच्छति॥ **3.42.26** ॥

मृगयूथैरनुगतः पुनरेव निवर्तते।
सीतादर्शनमाकाङ्क्षन् राक्षसो मृगतां गतः॥ **3.42.27** ॥

परिभ्रमति चित्राणि मण्डलानि विनिष्पतन्।
समुद्वीक्ष्य च सर्वे तं मृगा येऽन्ये वनेचराः॥ **3.42.28** ॥

उपगम्य समाघ्राय विद्रवन्ति दिशो दश।
राक्षसः सोऽपि तान् वन्यान् मृगान् मृगवधे रतः॥ **3.42.29** ॥

प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन्।
तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥ **3.42.30** ॥

कुसुमापचये व्यग्रा पादपानत्यवर्तत।
कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ॥ **3.42.31** ॥

कुसुमान्यपचिन्वन्ती चचार रुचिरानना।
अनर्हा वनवासस्य सा तं रत्नमयं मृगम् ॥ **3.42.32** ॥

मुक्तामणिविचित्राङ्गं ददर्श परमाङ्गना।
तं वै रुचिरदन्तोष्ठं रूप्यधातुतनूरुहम् ॥ **3.42.33** ॥

विस्मयोत्फुल्लनयना सस्नेहं समुदैक्षत।
स च तां रामदयितां पश्यन् मायामयो मृगः ॥ **3.42.34** ॥

विचचार ततस्तत्र दीपयन्निव तद् वनम्।
अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगम्।
विस्मयं परमं सीता जगाम जनकात्मजा ॥ **3.42.35** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्विचत्वारिंशः सर्गः ॥